# शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र दिल्ली
## प्रश्नपत्रविश्लेषणम्  (सत्रम्– 2024-25)

**खण्डः- क**

**अपठित – अवबोधनम्**                                   **10 अङ्काः**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

गीता एकः पवित्रः ग्रन्थोऽस्ति, यस्मिन् श्रीकृष्णार्जुनयोः संवादस्य वर्णनम् अस्ति। महाभारतयुद्धे कुरुक्षेत्रे कौरवपाण्डवानां सेनयोः मध्ये श्रीकृष्णः मोहग्रस्तम् अर्जुनं गीतोपदेशं प्रायच्छत्। ग्रन्थोऽयम् जीवने मार्गदर्शनस्य आत्मसाक्षात्कारस्य च महत्त्वपूर्णः स्रोतः अस्ति। गीतायाम् सप्तशतं (700) श्लोकाः सन्ति। एषु श्लोकेषु धर्माधर्मौ, कर्तव्याकर्त्तव्यौ, आत्मज्ञानं, जीवनोद्देश्यानि, कर्मयोगः, ज्ञानयोगः, भक्तियोगश्चेत्यादयः विषयाः सुस्पष्टतया निगदिताः सन्ति। एषु विषयेषु कर्मयोगः सर्वाधिकः प्रसिद्धो वर्तते। कर्मयोगं कथयन् श्रीकृष्णः वदति यत्– मनुष्यः फलस्य इच्छां न कुर्यात्, मात्रं स्वकीये कर्मणि संलग्नो भवेत्। गीताग्रन्थः न केवलं भारतदेशे अपितु सम्पूर्णेऽपि विश्वे आदरं लभते। गीतायाः उपदेशानां सर्वत्र प्रसाराय प्रत्येकस्मिन् वर्षे मार्गशीर्षमासस्य शुक्लपक्षस्य एकादश्यां तिथौ गीताजयन्त्याः आयोजनम् उत्सवपूर्वकं क्रियते। अस्मिन् अवसरे गीतापाठः, भजनकीर्तनं, धार्मिकानुष्ठानानि गीताश्लोकगायन-प्रतियोगिताः व्याख्यानानि चेत्यादयः कार्यक्रमाः आयोज्यन्ते।

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**                                   **(1x2-2)**

(1) गीता कीदृशो ग्रंथोऽस्ति ?   **पवित्रः**
(ii) कः गीतोपदेशं प्रायच्छत्?  **श्रीकृष्णः**
(iii) गीतायां कति श्लोकाः सन्ति? **सप्तशतं (700)**

(i) छात्राः अपठितगद्यांशात् एकपदस्य समुचितोत्तरस्य अन्वेषणं कुर्वन्ति।
**परामर्शः**– छात्रान् वाक्यस्य समुचितम् अर्थग्रहणाय प्रेरणम्।

**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**                                   **(2x2-4)**

(i) श्रीकृष्णः गीतोपदेशं कुत्र प्रायच्छत्?
**उत्तरम्**– महाभारतयुद्धे कुरुक्षेत्रे कौरवपाण्डवानां सेनयोः मध्ये मोहग्रस्तम् अर्जुनं श्रीकृष्णः गीतोपदेशं प्रायच्छत्।

(ii) कर्मयोगविषये श्रीकृष्णः किं वदति?
**उत्तरम्**– कर्मयोगं कथयन् श्रीकृष्णः वदति यत् मनुष्यः फलस्य इच्छां न कुर्यात्, मात्रं स्वकीये कर्मणि संलग्नो भवेत्।

(iii) गीताजयन्त्याः आयोजनं कदा क्रियते?

**उत्तरम्**– गीताजयन्त्याः आयोजनं प्रत्येकस्मिन वर्षे मार्गशीर्षमासस्य शुक्लपक्षस्य एकादश्यां तिथौ उत्सवपूर्वकं क्रियते।

(i) छात्राः अपठितगद्यांशात् आत्मावबोधनाधारेण उत्तरनिर्धारणार्थं समुचितवाक्यानां चयनं कुर्वन्ति।
**परामर्शः**– छात्राः अपठितगद्यांशस्य अवबोधने समर्थाः भवेयुः।

**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। (1x1=1)**

'गीता/गीता–जयन्ती' अथवा अन्यत् किमपि समुचितम्।
**परामर्शः**– छात्राः अपठितगद्यांशस्य केन्द्रीयभावग्रहणे समर्थाः भवेयुश्चेत् द्वित्रिपदात्मकं शीर्षकं चेतुं समर्थाः भविष्यन्ति।

**ई. यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्) 1x3=3**

**(i) "पवित्रो ग्रन्थः" अत्र विशेष्यपदं किम् ?**

(क) एकः इति असम्बद्धः विकल्पः।
(ख) पवित्रः इति चित्तभ्रामकः विकल्पः।
**(ग) ग्रन्थः इति विशेष्यपदम्**
(घ) गीता इति असम्बद्धः विकल्पः।
**परामर्शः**– विशेष्यविशेषणस्य सम्यगवबोधः प्रयोजनम्।

**(ii) "एषु विषयेषु कर्मयोगः सर्वाधिकः प्रसिद्धो वर्तते" अस्मिन् वाक्ये क्रियाप्रदं किम् ?**

**(क) वर्तते इति समुचितम् उत्तरम्**
(ग) कर्मयोगः इति असम्बद्धः विकल्पः।
(ख) एषु इति असम्बद्धं विकल्पम्।
(घ) सर्वाधिकः इति असम्बद्धः विकल्पः।
**परामर्शः**– वाक्यरचनायाः अभ्यासे कर्तृक्रियापदानां ज्ञानम्।

**(iii) "ख्यातः" इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?**

(क) महत्त्वपूर्णः इतिसमीपवर्ती विकल्पः।
(ख) पवित्रः इति असम्बद्धः विकल्पः।
(ग) आदरं इति असम्बद्धः विकल्पः।
**(घ) प्रसिद्धः इति समुचितः विकल्पः।**
**परामर्शः**– पदस्यार्थस्य समुचितं ज्ञानम्।

DoE, Delhi

**(iv) "मनुष्यः फलस्य इच्छां न कुर्यात्" अस्मिन् वाक्ये कर्तृपदं किम्?**

(क) फलस्य इति असम्बद्धः विकल्पः।
**(ख) मनुष्यः इति समुचितः विकल्पः।**
(ग) कुर्यात् इति असम्बद्धः विकल्पः।
(घ) इच्छां इति चित्तभ्रामकः विकल्पः।
**परामर्शः**– वाक्यरचनायाः अभ्यासे कर्तृक्रियापदानां ज्ञानम्।

## खण्डः ख

**रचनात्मककार्यम्** **15 अङ्काः**

**2. पत्रलेखनम्**
भवती हेमांशी अस्ति। भवती छात्रावासात् स्वानुजं दक्षं शीतर्तोः समये स्वास्थ्यरक्षणाय लिखिते अस्मिन् पत्रे रिक्तस्थानेषु मञ्जूषातः समुचितपदानि पूरयित्वा पत्रं पुनः लिखतु।

जयपुरतः
दिनाङ्कः ......................
प्रिय अनुज **(i दक्ष** )!
**(ii सस्नेहम्)** आशीर्वचः।
भवतः पत्रं पठित्वा मनः **(iii प्रसन्नम्)** अस्ति। भवान् माता च ग्रामे सुखेन स्तः' इति ज्ञात्वा पिता अपि **(iv अतीव)** प्रसन्नः अस्ति। भ्रातः! इदानीं **(v शीतर्तोः)** आरम्भः जातः। शीतर्तौ **(vi स्वास्थ्यरक्षणाय)** भवान् सावधानो भवेत्। मातरम् उक्त्वा ऊष्मवस्त्राणि (vii **निष्कासयेत्**) ऊष्मवस्त्राणि धारयित्वा एव बहिः गच्छेत्। अन्यथा स्वास्थ्यहानिः (**viii भवितुं**) शक्यते। भवान् तु जानाति एव यत् स्वास्थ्यरक्षणं परमावश्यकम् अस्ति। **(ix पितामहाय)** प्रणामाः।
भवतः अग्रजा
(**x हेमांशी**)

**मञ्जूषा**

| |
|---|
| हेमांशी, शीतर्तोः, निष्कासयेत्, सस्नेहम्, दक्ष, अतीव, भवितु, प्रसन्नम्. पितामहाय, स्वास्थ्यरक्षणाय |

**परामर्शाः-** औपचारिकस्य अनौपचारिकस्य च पत्रस्य प्रारूपस्य ज्ञानम्। छात्रेषु रचनात्मकदक्षतायाः वर्धनाय पत्रलेखनस्य समये समुचितानां शब्दानां चयनकौशलस्य सामर्थ्य-संपादनम्।

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत –** **(1x5-5)**

**मञ्जूषा**

पर्वतीयस्थलम्, जनाः, पर्यटनाय, आगच्छन्ति, हिमं, हिमशिखराः, वनस्पतयः, औषधयः, काष्ठनिर्मितमार्गाः, शैत्यम्

अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। वाक्यशुद्धि: द्रष्टव्या। अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति। वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्ध: अङ्क: भावस्य कृते अर्ध: अङ्क:च व्याकरणशुद्धतानिमित्ताय निर्धारितः अस्ति। मञ्जूषायां प्रदताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्र : स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।

अथवा

**अनुच्छेदलखनम्**

अधोलिखितं विषयं स्वीकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–

**सङ्गणकयन्त्रम्**

| |
|---|
| प्रविधियुगम्, सर्वाणि कार्याणि, कार्यालयेषु, शीघ्रतया, यात्रायै, आरक्षणं, सम्भवति, सौविध्यम्, नूतनज्ञानम्, उपलभ्यते |

अयं विकल्पः सर्वेषां कृते अस्ति। छात्रा: मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति, अतः अङ्काः देयाः। अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीया:।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्) 1x5=5**

(i) ग्रामम् अभितः नदी अस्ति।

(ii)अद्य वयं तृतीयं पाठं पठिष्यामः।

(iii) त्वं मात्रा सह गृहं गच्छ।

(iv) अर्जुन: महान् वीरः आसीत्।

(v) सदा सत्यमेव विजयते।

(vi) संस्कृतं सर्वोतमा भाषा अस्ति।

(vii) पर्यावरणरक्षा अस्माकं कर्तव्यम् अस्ति।

**परामर्शा:-** छात्रान् कर्तृपदानां क्रियापदानाम् अवबोधनं मुख्यम् उद्देश्यम्। कारकविभक्त्यनुगुणं छात्राणां कृते वाक्यरचनाया: अभ्यास:। क्रिया कर्ताऽनुगामिनी भवेत्।

**'ग'-खण्डः**

**अनुप्रयुक्त-व्याकरणम् 25 अङ्काः**



DoE, Delhi

**5. अधोलिखितेषु वाक्येषु रेखांकितपदस्य सन्धिपदं सन्धिच्छेदपदं वा लिखत (केवलं प्रश्नचतुष्टयम्) 1x4=4**

**(i)** दुर्वहमत्र जीवितं जातं **प्रकृतिरेव** शरणम्। अभ्यासवान भव पुस्तकस्य साहाय्येन विसर्गसन्धिं बोधयत।

**(ii)** अयमेकः **तावद्+विभज्य** भुज्यताम्। अभ्यासवान भव पुस्तकस्य साहाय्येन व्यञ्जनसन्धिं बोधयत।

**(iii) वयसः+तु** न किञ्चिदन्तरम्। अभ्यासवान भव पुस्तकस्य साहाय्येन विसर्गसन्धिं बोधयत।

**(iv) "नागाश्च"** वहन्ति बोधिताः। अभ्यासवान भव पुस्तकस्य साहाय्येन विसर्गसन्धिं बोधयत।

**(v)** या शोभा **सरसः+ भवेत्।** अभ्यासवान भव पुस्तकस्य साहाय्येन विसर्गसन्धिं बोधयत।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्) 1x4=4**

**(i) वाष्पयानमाला** संधावति वितरन्ती ध्यानम्।

(क) वाष्पयाने माला इति चित्तभ्रामकः विकल्पः।
(ख) वाष्पयानैः माला इति असम्बद्धः विकल्पः।
**(ग) वाष्पयानानां माला इति समुचितम् उत्तरम्**
(घ) वाष्पयानं माला इति चित्तभ्रामकः विकल्पः।

**(ii)** विदूषकेनोपदिश्यमानमार्गी तापसौ **कुशश्च लवश्च।**

**(क) कुशलवौ इति समुचितम् उत्तरम्**
(ख) कुशलवम् इति असम्बद्धः समासः।
(ग) कुशलवे इति असम्बद्धः समासः।
(घ) कुशलवाः इति असम्बद्धः समासः।

**(iii) व्यवधानेन सहितं** न चारित्रलोपाय।

(क) सहव्यवधानं इति असम्बद्धः समासः।
**(ख) सव्यवधानम् इति समुचितम् उत्तरम्**
(ग) व्यवधानरहितं इति चित्तभ्रामकम् उत्तरम्
(घ) निर्व्यवधानं इति असम्बद्धः समासः।

(iv) कृत्येन केन भवितासि **कृतः उपकारः येन सः।**

DoE, Delhi

**(क) कृतोपकारः इति समुचितम् उत्तरम्**
(ख) कृतुपकारः इति चित्तभ्रामकम् उत्तरम्
(ग) उपकारकृतम् इति असम्बद्धः समासः।
(घ) कृत्युपकारः इति असम्बद्धः समासः।

**(v)** भृङ्गाः **रसालमुकुलानि** समाश्रयन्ते।

(क) रसालानि मुकुलानि इति असम्बद्धः समासः।
(ख) रसालैः मुकुलानि इति असम्बद्धः समासः।
(ग) रसालात् मुकुलानि इति असम्बद्धः समासः।
**(घ) रसालानां मुकुलानि इति समुचितम् उत्तरम्**

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्) 1x4=4**

**(i)** हरिततरूणां ललितलतानां माला **रमणीया।**
**(क) रमणीय+टाप् इति समुचितम् उत्तरम्।**
(ख) रमणी+ या इति चित्तभ्रामकम् उत्तरम्।
(ग) रमण्-ईया इति असम्बद्धम् उत्तरम्।
(घ) रमणी-या इति चित्तभ्रामकम् उत्तरम्।

**(ii)** **'धन+मतुप्'** जनः कारयानं क्रेष्यति।
(क) धनमान् इति चित्तभ्रामकम् उत्तरम्।
**(ख) धनवान् इति समुचितम् उत्तरम्।**
(ग) धनमत् इति असम्बद्धम् उत्तरम्।
(घ) धनमतु इति असम्बद्धम् उत्तरम्।

**(iii)** लोकतन्त्रे **जनता** सर्वोच्चस्थाने तिष्ठति।
(क) जन+ता इति चित्तभ्रामकम् उत्तरम्।
(ख) जनत+आ इति असम्बद्धम् उत्तरम्।
(ग) जन्+अता इति असम्बद्धम् उत्तरम्।
**(घ) जन+तल् इति समुचितम् उत्तरम्।**

**(iv)** **'विज्ञान ठक्'** अन्वेषणे रताः भवन्ति।



DoE, Delhi

(क) विज्ञानिकाः  इति असम्बद्धम् उत्तरम्।

(ख) वेज्ञनिकाः   इति असम्बद्धम् उत्तरम्।

**(ग) वैज्ञानिकाः  इति समुचितम् उत्तरम्।**

(घ) वैज्ञनिकाः   इति असम्बद्धम् उत्तरम्।

**(v)** जानस्य **महत्त्वं** सर्वत्र भवति।

**(क) महत्+त्व   इति समुचितम् उत्तरम्।**

(ख) महत्+ त्वत्  इति चित्तभ्रामकम् उत्तरम्।

(ग) महा+ त्त्वम्    इति असम्बद्धम् उत्तरम्।

(घ) महान्+त्त्व     इति असम्बद्धम् उत्तरम्।

**परामर्शः**– प्रत्ययानां सम्यगवबोधः।

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं विकल्पेन पूरयत। (केवलं प्रश्नत्रयम्)**

(i) स्वप्ना अयि संध्ये! **... त्वया ....**किं पठ्यते ?

(क) त्वम्

(ख) त्वया

(ग) तव

(घ) त्वाम्

**(ख) त्वया इति समुचितम् उत्तरम् ।  यदा छात्राणां वाच्ये गतिर्भविष्यति तदैव  "पठ्यते" इति पदं दृष्ट्वा छात्राः "त्वया" इति तृतीयान्तम् उचितं पदं योजयितुं शक्यन्ते।**

(क) त्वम् इति चित्तभ्रामकम् उत्तरम्  अत्र यदि कर्तृवाच्यं युज्येत तर्हि तदनुसारं कर्तरि त्वमिति प्रथमान्तं पदं भवेत्।

(ग) तव  इति चित्तभ्रामकम् उत्तरम्। तव इति षष्ठ्यन्तं पदं सम्बन्धेन युक्तं भवति।

(घ) त्वाम्  इति चित्तभ्रामकम् उत्तरम्। त्वाम् इति द्वितीयान्तं पदम्।

(ii) संध्या स्वप्ने! अहम् एकां कथां **...... पठामि ........**।

(क) पठति

(ख) पठसि

(ग) पठामि

(घ) पठ्यते

(क) पठति इति असंगतम् उत्तरम्। पठति पदस्य संगतिः प्रथमपुरुषेण भाव्यम्।

(ख) पठसि इति असंगतम् उत्तरम्। पठसि पदस्य संगतिः मध्यमपुरुषेण भाव्यम्।

**(ग) पठामि इति समुचितम् उत्तरम् । पठामि पदस्य संगतिः उत्तमपुरुषेण भाव्यम्।**

(घ) पठ्यते इति असंगतम् उत्तरम्। कर्तृकर्मभ्यां न सहैव प्रयोगः।

(iii) स्वप्ना– त्वया **……… कथा……..** किमर्थं पठ्यते।

(क) कथा

(ख) कथां

(ग) कथया

(घ) कथायै

**(क) कथा इति समुचितम् उत्तरम् । कर्मवाच्ये तृतीयान्तकर्त्रा त्वया सह कर्मणि प्रथमा भवति।**

(ख) कथाम् इति असंगतम् उत्तरम्। कर्तृवाच्ये कर्तरि प्रथमा भवति, परञ्च आत्मनेपदी धातुना सह कर्तरि तृतीया कर्मणि च प्रथमा विभक्तिर्भवति।

(ग) कथया इति असंगतम् उत्तरम्। पूर्ववत् बोध्यम्।

(घ) कथायै इति असंगतम् उत्तरम्।

(iv) संध्या**……… अहम् ………..** मनोविनोदाय कथां पठामि।

(क) मम

(ख) मया

(ग) माम्

(घ) अहम्

(क) मम इति असंगतम् उत्तरम्।

(ख) मया इति असंगतम् उत्तरम्।

(ग) माम् इति असंगतम् उत्तरम्।

**(घ) अहम् इति समुचितम् उत्तरम् । उत्तमपुरुषस्य कर्त्रा सह उत्तमपुरुषस्य क्रिया युज्यते।**

**9. प्रदत्तेभ्यः रिक्तस्थानेभ्यः समुचितं कालबोधकशब्दं लिखत - (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) विनोदः (5:00) **…… पञ्चवादने ……..** उतिष्ठति।

(ii) सः (6:30) **…… सार्धषड्वादने ……..** स्नानं करोति।

(iii) सः (7:15) **………सपादसप्तवादने** ….. विद्यालयं प्रति गच्छति।

DoE, Delhi

(iv) सः (8:45) ………**पादोननववादने**…….. कक्ष्यायां संस्कृतं पाठयति।

(vi) सः (2:30) …… **सार्धद्विवादने**…….. विद्यालयात् निर्गच्छति।

**परामर्शः**– भाषायां समयस्य ज्ञानम् अनिवार्यम्। ज्ञात्वा लिखन्तु।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्) 1x3=3**

(1) …… **ह्यः** ………..विद्यालये प्रतियोगिता आसीत्।

**परामर्शः**– आसीत् इति भूतकालिकां क्रियां दृष्ट्वा विगतदिवसस्य संगतिः स्वीकरणीया। अर्थात् अत्र ह्यः पदस्य संगतिः भविष्यति।

(ii) कच्छपः …… **शनैः** ……….. चलति। कच्छपेन सह मन्दगतेः अनुसरणं स्वाभाविकं दृष्ट्वा शनैः पदमनुसरणीयम्।

(iii) यदि वृष्टिः भविष्यति, …… **तर्हि** ……….. मार्गे जलं भविष्यति। यत्तदोर्नित्यसम्बन्धः इत्यनेन यदिपदेन सह तर्हि पदस्य संगतिर्भविष्यति।

(iv) …… **यत्र** ………..हरीतिमा अधिका भवति, तत्र वातावरणं शुद्ध भवति। पूर्ववत्विज्ञेयम्।

**मञ्जूषा**

| |
|---|
| यत्र, ह्यः, शनैः, तर्हि |

**11. अधोलिखितवाक्येषु रेखाङ्कित - अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - ( केवलं प्रश्नत्रयम् ) (1x3=3)**

**परामर्शः** – विशेषण–विशेष्य–परिचयः शिक्षकेण पूर्वमेव दातव्यः।

**(i)** भीमसेनः **बलिष्ठम्** आसीत्।

(क) बलिष्ठा इति असंगतम् उत्तरम्।

(ख) बलिष्ठे इति असंगतम् उत्तरम्।

**(ग) बलिष्ठः** इति समुचितम् उत्तरम् । **भीमसेनः** विशेष्यं पुल्लिङ्गे वर्तते, तस्य विशेष**णं बलिष्ठः अपि** पुल्लिङ्गे भविष्यति।

(घ) बलिष्ठी इति असंगतम् उत्तरम्।

**(ii) त्वं** केन मार्गेण गच्छति?

**(क) सः इति समुचितम् उत्तरम् । प्रथमपुरुषेण सह प्रथमपुरुषस्य सः तौ ते इत्येतेषां क्रमशः सङ्गतिः समुचिता।**



DoE, Delhi

(ख) अहम् इति असंगतम् उत्तरम्।
(ग) वयम् इति असंगतम् उत्तरम्।
(घ) युवाम् इति असंगतम् उत्तरम्।

**(iii)** श्वः मुख्यमंत्री **आगच्छति।**
(क) आगच्छत् इति चित्तभ्रामकम् उत्तरम्।
**(ख) आगमिष्यति इति समुचितम् उत्तरम् ।**
(ग) आगमिष्यसि इति असंगतम् उत्तरम्।
(घ) आगमिष्यामि इति असंगतम् उत्तरम्।

**(iv) छात्रः** प्राङ्गणे क्रीडन्ति।
(क) छात्रेण इति असंगतम् उत्तरम्।
(ख) छात्री इति असंगतम् उत्तरम्।
(ग) छात्राभ्याम् इति असंगतम् उत्तरम्।
**(घ) छात्राः इति समुचितम् उत्तरम् । बहुवचनस्य क्रियया सह बहुवचनस्य कर्ता अपेक्षितः।**

**परामर्शः**– विशेषण–विशेष्यस्य ज्ञानम्।

## घ–खण्डः

## पठितावबोधनम्

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

कश्चित् कृषकः वलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्वलं वृषभं तोदनेन नुद्रद्यमानः अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः। भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्। सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्-"अयि शुभे! किमेवं रोदिषि? उच्यताम्" इति।

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1**

DoE, Delhi

(क) कृषकः बलीवर्दाभ्यां किं कुर्वन्नासीत्? **क्षेत्रकर्षणम्**

(ख) दुर्बलः बलीवर्दः कुत्र पपात? **क्षेत्रे**

(ग) कस्याः नेत्राभ्याम् अश्रूणि आविरासन्? **सुरभेः/ मातुः**

**परामर्श:-**छात्रा: पठितगद्यांशाद् समुचितस्य उत्तरस्य अन्वेषणे समर्था: भवेयुः।

**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 1x2=2**

(क) कृषकः कं तोदनेन नुद्यमानः अवर्तत?

**उत्तरम्–** (क) कृषकः दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत।

(ख) क्रुद्धः कृषीवलः किम् अकरोत्?

**उत्तरम्–** (ख) क्रुद्धः कृषीवलः क्षेत्रे पतितं वृषभम् उत्थापयितुं बहुवारम् यत्नमकरोत्।

(ग) सुराधिपः सुरभि किम् अपृच्छत्?

**उत्तरम्–** (ग) सुराधिपः सुरभिम् अपृच्छत् " अयि शुभे ! किमेवं रोदिषि **?** उच्यताम् " इति।

**परामर्श:-** छात्रा: पठितगद्यांशाद् अवबोधनस्य आधारेण समुचितवाक्यस्य चयने समर्था: भवेयुः।

**(इ.) यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2**

(क) "अयि शुभो किमेवं रोदिषि?" अस्मिन् वाक्ये क्रियापदं किम्?

**उत्तरम्–** (क) रोदिषि (छात्राणां कृते क्रियापदानाम् एवञ्च कर्तृपदानां ज्ञानसम्पादनम्)

(ख) 'इन्द्रः' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

**उत्तरम्–** (ख) सुराधिपः (छात्राणां कृते समानपदानां ज्ञानसम्पादनम्)

(ग) "क्रुद्धः कृषीवलः" अत्र विशेषणपदं किम्?

**उत्तरम्–** (ग) क्रुद्धः (छात्राणां कृते विशेषणविशेष्यो: ज्ञानसम्पादनम्)

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ½ x2=1**

(क) कः प्रथमो धर्म: ? **आचार:**

(ख) 'आचारः प्रथमो धर्मः' इति केषां वचः? **विदुषाम्**

(ग) तस्मात् के रक्षेत्? **सदाचारम्**

DoE, Delhi

**परामर्श:-** छात्रा: पठितपद्यांशाद् समुचितस्य उत्तरस्य अन्वेषणे समर्था: भवेयुः।

**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 1x2=2**

(क) आचारः कतमो धर्म: ?

**उत्तरम्–** (क) आचारः प्रथमो धर्मः ।

(ख) विदुषां किं वचः?

**उत्तरम्–** (ख) आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

(ग) सदाचारं कथं रक्षेत्?

**उत्तरम्–** (ग) सदाचारं विशेषतः प्राणेभ्योऽपि रक्षेत् ।

**इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2**

(क) "प्रथमो धर्मः" अत्र विशेष्यपदं किम् ?

**उत्तरम्–** **धर्मः**(छात्राणां कृते विशेषणविशेष्यो: ज्ञानसम्पादनम्)

(ख) "तस्माद् रक्षेत् सदाचारम्" अस्मिन् वाक्ये क्रियापदं किम् ?

**उत्तरम्–** **रक्षेत्** (छात्राणां कृते श्लोकेषु पद्येषु वा क्रियापदानाम् एवञ्च कर्तृपदानां ज्ञानसम्पादनम्)

(ग) 'मूर्खाणाम्' इत्यस्य किं विलोमपदं पद्यांशे प्रयुक्तम् ?

**उत्तरम्–** **विदुषाम्** (छात्राणां कृते विपरीतपदानां ज्ञानसम्पादनम्)

**परामर्श:-** छात्रा: पठितपद्यांशाद् अवबोधनस्य आधारेण समुचितवाक्यस्य चयने समर्था: भवेयुः ।

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

सिंहः **(**क्रोधेन गर्जन्**)** भोः! अहं वनराजः किं भयं न जायते**?** किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा **?**

एकः वानरः– यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि **?**

अन्यः वानरः – किं न श्रुता त्वया पञ्चतन्त्रोक्तिः–

यो न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा।

जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः ।।

काकः – आम् सत्यं कथितं त्वया – वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

DoE, Delhi

**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) ½ x2=1**

(क) कः क्रोधेन गर्जन् वदति? **सिंहः**
(ख) राजा कीदृशः भवति? **रक्षकः**
(ग) सिंहः कः भवितुं सर्वथा अयोग्यः? **वनराजः**
**परामर्शः-** छात्राः पठितपद्यांशाद् समुचितस्य उत्तरस्य अन्वेषणे समर्थाः भवेयुः।

**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) 1x2=2**

(क) सिंहः क्रोधेन गर्जन् किं कथयति?
**उत्तरम्–** सिंहः क्रोधेन गर्जन् कथयति– भोः! अहं वनराजः किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा।
(ख) कृतान्तः कः?
**उत्तरम्–** यः सदा परैः वित्रस्तान् पीड्यमानान् जन्तून् न रक्षति, सः पार्थिवरुपेण कृतान्तः भवति।
(ग) सिंहः कस्यां समर्थः नास्ति ?
**उत्तरम्–** सिंह : स्वरक्षायाम् अपि समर्थः नास्ति।
**परामर्शः-** छात्राः पठितपद्यांशाद् अवबोधनस्य आधारेण समुचितवाक्यस्य चयने समर्थाः भवेयुः।

**इ यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2**
(क) "राजा तु रक्षकः भवति" अस्मिन् वाक्ये कर्तृपदं किम् ?

**उत्तरम्–** राजा (छात्राणां कृते क्रियापदानाम् एवञ्च कर्तृपदानां ज्ञानसम्पादनम्)
(ख) "अनुच्छेदे मिथ्यापदस्य किं पर्यायपदं प्रयुक्तम्?

**उत्तरम्–** सत्यम् (छात्राणां कृते विपरीतपदानां ज्ञानसम्पादनम्)
(ग) 'प्राणिनः' इत्यस्य किं पर्यायपदं नाट्यांशे प्रयुक्तम् ?

**उत्तरम्–** जन्तून् (छात्राणां कृते विपरीतपदानां ज्ञानसम्पादनम्)

**15. रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्ननिर्माणं कुरुत-(केवलं प्रश्नचतुष्टयम्) 1x4=4**

**(i)** <u>**अतिदीर्घः**</u> प्रवासः अयम्। **कीदृशः**
**(ii)** सर्वे <u>**प्रकृतिमातरं**</u> प्रणमन्ति। **काम्**
**(iii)** गुणी <u>**गुणं**</u> वेत्ति। **कम्**
**(iv)** <u>**चौरस्य**</u> पादध्वनिना अतिथिः प्रबुद्धः। **कस्य**
**(v)** <u>**मानवाय**</u> जीवनं कामये। **कस्मै**

**परामर्शः-** छात्राणां कृते प्रश्नवाचकपदानां ज्ञानसम्पादनम्, किम् शब्दरूपाणां ज्ञानम्।

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत - 1x4=4**



DoE, Delhi

**श्लोकः-**

उदीरितोऽर्थः पशुनापि गृह्यते, हयाश्च नागाश्च वहन्ति बोधिताः।
अनुक्तमप्यूहति पण्डितो जनः, परेङिङ्गतज्ञानफला हि बुद्धयः।।

**अन्वयः**– पशुना अपि उदीरितः **(i)…… अर्थः ………..** गृह्यते। हयाः **(ii) …… नागाः ………..** च बोधिताः (भारं) वहन्ति। **(iii)…… पण्डितः ………..**जनः अनुक्तम् अपि ऊहति, बुद्धयः **(iv) …… परेङ्ङ्गितज्ञानफलाः ……..** भवन्ति।

| परेङ्ङ्गितज्ञानफलाः, अर्थः, नागाः, पण्डितः |
|---|

**परामर्शः -** श्लोकस्य अर्थानुसारं पदानां व्यवस्थापन- कौशलस्य सम्पादनम्।

अथवा

**मञ्जूषायाः साहाय्येन रिक्तस्थानानि पूरयित्वा श्लोकस्य भावार्थं पुनः लिखत - (1x4-4)**

**श्लोकः-**

निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।
अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात्।।

**भावार्थः** – यथा बुद्धिमती **(1) …… स्वकीयबुद्ध्या ……..** व्याघ्रजनितभयाद् **(ii) …… मुक्ता …..** अभवत्, तथैव लोके यः जनः **(iii) …… बुद्धिमान् …..** भवति, सः स्वकीयबुद्ध्या महतोऽपि **(iv) ……भयात् ...** मुक्तिं प्राप्नोति ।

**मञ्जूषा**

| भयात्, बुद्धिमान्, मुक्ता, स्वकीयबुद्ध्या |
|---|

**परामर्शः-** श्लोकस्य भावार्थस्य ज्ञानं, संस्कृते अर्थलेखनस्य सामर्थ्य–संपादनम्।

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत – ½ x8=4**

(i) कस्मिंश्चित् गृहे आश्रयं स्वीकृतवान्, तस्मिन्नेव गृहे चौरः प्रविष्टः।

DoE, Delhi

(ii) आरक्षी तमुवाच – अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारावासं लप्स्यसे।

(iii) कश्चन निर्धनो जनः स्वपुत्रं महाविद्यालये प्रवेशं कारितवान्।

(iv) न्यायाधीशः तं जनं ससम्मानं मुक्तवान्।

(v) न्यायाधीशः आरक्षिणम् अभियुक्तं च शवं न्यायालये आनेतुम् आदिष्टवान्।

(vi) गृहीते सति चौरः एवं उच्चैः क्रोशितुम् आरभत "चौरोऽयं चौरोऽयम्"।

(vii) सः पुत्रस्य रुग्णतामाकर्ण्य तं द्रष्टुं प्रस्थितः।

(viii) रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

**उत्तरम्**–

(iii) कश्चन निर्धनो जनः स्वपुत्रं महाविद्यालये प्रवेशं कारितवान्।
(vii) सः पुत्रस्य रुग्णतामाकर्ण्य तं द्रष्टुं प्रस्थितः ।
(i) कस्मिंश्चित् गृहे आश्रयं स्वीकृतवान्, तस्मिन्नेव गृहे चौरः प्रविष्टः।
(vi) गृहीते सति चौर: एवं उच्चैः क्रोशितुम् आरभत "चौरोऽयं चौरोऽयम्"।
(viii) रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।
(v) न्यायाधीशः आरक्षिणम् अभियुक्तं च शवं न्यायालये आनेतुम् आदिष्टवान्।
(ii) आरक्षी तमुवाच– अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारावासं लप्स्यसे ।
(iv) न्यायाधीशः तं जनं ससम्मानं मुक्तवान् ।

**परामर्श:-** कथाया: भावार्थस्य ज्ञानसम्पादनम्, वाक्यानां कथाक्रमानुसारेण योजनम् ।

**18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुकूलम् उचितार्थं चिनुत (केवलं प्रश्नत्रयम्) 1 x3 =3**

(1) **<u>अम्बूनि</u>** यत्र नलिनानि निषेवितानि।

(क) कमलानि इति असम्बद्धम् उत्तरम्।

**(ख) जलानि इति समुचितम् उत्तरम् ।**

(ग) पुष्पाणि इति असम्बद्धम् उत्तरम्।

(घ) वनानि इति असम्बद्धम् उत्तरम्।

(ii) **<u>भृङ्गाः</u>** रसालमुकुलानि समाश्रयन्ते।

**(क) भ्रमराः इति समुचितम् उत्तरम् ।**

(ख) खगाः इति असम्बद्धम् उत्तरम्।

(ग) मत्स्याः इति असम्बद्धम् उत्तरम्।

(घ) मेघाः इति असम्बद्धम् उत्तरम्।

(iii) नवमालिका रसालं मिलिता **<u>रुचिरं</u>** संगमनम्।



DoE, Delhi

(क) अत्यधिकम्  इति असम्बद्धम् उत्तरम्।

(ख) दुष्करम् इति असम्बद्धम् उत्तरम्।

**(ग) सुन्दरम् इति समुचितम् उत्तरम् ।**

(घ) मलिनम्  इति असम्बद्धम् उत्तरम्।

(iv) मनः शोषयत् **तनुः** पेषयद्।

(क) तनयः इति असम्बद्धम् उत्तरम्।

(ख) हृदयम्  इति असम्बद्धम् उत्तरम्।

(ग) कपोल: इति असम्बद्धम् उत्तरम्।

(घ) शरीरम्  **इति समुचितम् उत्तरम् ।**

**परामर्शः** – छात्राणां कृते पर्यायपदानाम् अवबोधनम्, एवञ्च प्रसङ्गानुसारम् अर्थग्रहणस्य सामर्थ्य–विस्तरः।

DoE, Delhi